# Rajashyamalarahasya Upanishad

# રાજશ્યામલારહસ્યોપનિષત્

## Document Information

Text title : rAjashyAmalArahasyopaniShat

File name : rAjashyAmalArahasyopaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti, Aruna Narayanan

Description-comments : aprakAshitA upaniShadaH

Latest update : February 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2021

*sanskritdocuments.org*

# રાજશ્યામલારહસ્યોપનિષત્

ॐ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।
ॐ રત્નસાનુશિખરેષ્વાસીનં શ્રીરાજશ્યામલારહસ્યોપનિષદ્વેત્તારં મતઙ્ગઋષિં ગુરું કૂચિમારઃ પ્રોવાચ । મતઙ્ગ ભગવન્ ગુરો રાજશ્યામલારહસ્યોપનિષદં મેઽનુબ્રૂહિ । મતઙ્ગભગવાન્ કૂચિમારં સ હોવાચ । તે રાજશ્યામલારહસ્યોપનિષદમુપદિશામિ ॥

અથાતઃ શ્રીરાજશ્યામલારહસ્યોપનિષદં વ્યાખ્યાસ્યામઃ । મન્ત્રજપાધિકરણન્યાસાધિકરણસ્તોત્રાધિકરણપૂજાધિકરણમૈથુનાધિકરણૈઃ પઞ્ચભિર્બ્રાહ્મણો ભોગમોક્ષમાપ્નોતિ । ગુરોરનુજ્ઞયા શ્રીરાજશ્યામલામન્ત્રં નિત્યં સહસ્રસઙ્ખ્યયા ત્રિશતેન વાઽષ્ટાવિંશદુત્તરશતેન વા જપ્ત્વા મન્ત્રસિદ્ધિર્ભવતિ । શુક્રવારે ભાર્યાજગન્મોહનચક્રે ત્રિશતં મન્ત્રજપેન મન્ત્રસિદ્ધિઃ । પુરશ્ચરણસિદ્ધિર્ભવતિ । નવાશીતિન્યાસાનાં ન્યસનેન દેવતાશરીરી ભવતિ । નવાશીતિન્યાસાનાં ન્યસનેન સર્વદેવૈર્નમસ્કૃતો ભવતિ । નવાશીતિન્યાસાનાં શરીરે ન્યસનેન ગન્ધર્વકન્યાભિઃ પૂજિતો ભવતિ । નવાશીતિન્યાસાનાં ન્યસનેન દેવસ્ત્રીભોગમાપ્નોતિ । રમ્ભાસમ્ભોગમાપ્નોતિ । નવાશીતિન્યાસાનાં ન્યસનેન દેવતારૂપમાપ્નોતિ । દેવતાશરીરી ભૂત્વા વિમાનવાન્ ભવતિ । વિમાનમારુહ્ય સ્વર્ગં ગચ્છતિ । સ્વર્ગં પ્રાપ્ય તદ્ભોગમાપ્નોતિ । જગન્મોહનચક્રે પાટલકુસુમૈઃ સહસ્રસઙ્ખ્યયા પૂજિતા શ્રીરાજશ્યામલા કામિતાર્થપ્રદા મઙ્ગલપ્રદા ભવતિ । વર્ષર્તૌ શ્રાવણે માસિ સર્વરાત્રિષુ ભાર્યાજગન્મોહનચક્રે ચમ્પકકુસુમૈઃ સહસ્રસઙ્ખ્યયા પૂજિતા શ્રીરાજશ્યામલાઽઽરોગ્યપ્રદા ભવતિ । તત્ર શુક્રવારે પૂજિતા મહાલક્ષ્મીપ્રદા ભવતિ । શુક્રવારયુતાયાં પૌર્ણમાસ્યાં ભાર્યાજગન્મોહનચક્રે શતસઙ્ખ્યયા શ્રીરાજશ્યામલામ્બાં પૂજયન્

દેહાન્તરે રમ્ભાસમ્ભોગમશ્નુતે । ભાદ્રપદે માસિ મહાલક્ષ્મીવ્રતદિનેષુ
ભાર્યાજગન્મોહનચક્રે શ્રીરાજશ્યામલામ્બાં જાજીકુસુમૈઃ પૂજયન્ માનવો
મહદૈશ્વર્યમાપ્નોતિ । શરત્કાલે સર્વરાત્રિષુ ભાર્યાજગન્મોહનચક્રે
નીલોત્પલૈઃ સહસ્રસઙ્ખ્યયા શ્યામલાં પૂજયન્ મહાભોગમશ્નુતે ।
શુક્રવારયુતાયાં પૌર્ણમાસ્યાં ભાર્યાજગન્મોહનચક્રે
શ્રીરાજશ્યામલાં પૂજયન્ કલ્હારૈઃ શચીભોગમશ્નુતે ।
હેમન્તકાલે સર્વરાત્રિષુ ભાર્યાજગન્મોહનચક્રે જવન્તીકુસુમૈઃ
સહસ્રસઙ્ખ્યયા પૂજયન્ વરુણદેવેન કનકચ્છત્રી ભવતિ ।
માર્ગશીર્ષે પૌર્ણમાસ્યાં ભાર્યાજગન્મોહનચક્રે કુસુમ્ભપુષ્પૈઃ
પૂજયન્ માનવો દેવેન્દ્રૈશ્વર્યમાપ્નોતિ । માઘ્યાં શુક્રવારયુક્તાયાં
ભાર્યાજગન્મોહનચક્રે દ્વન્દ્વમલ્લિકાકુડ્મલૈઃ સહસ્રસઙ્ખ્યયા
પૂજયન્ માનવો રાજસ્ત્રીસમ્ભોગમાપ્નોતિ । સર્વદા પુષ્પિણ્યાં ભાર્યાયાં
જગન્મોહનચક્રે વસન્તપુષ્પૈઃ પૂજયન્ માનવો દેવતાત્વમશ્નુતે ।
ચતુર્થ્યાં શુક્રવારયુક્તાયાં ભાર્યાજગન્મોહનચક્રે દેવતાં શ્યામલાં
જપન્ પરશિવત્વમાપ્નોતિ । શ્રીરાજશ્યામલામ્બાયાઃ પઞ્ચદશસ્તોત્રાણાં
પારાયણેન દેવતાસન્તુષ્ટિર્ભવતિ । મઙ્ગલપ્રદા રાજવશંકરી ચ
ભવતિ । દેવતાસાન્નિધ્યમાપ્નોતિ । સન્નિધાનેન સર્વનિવૃત્તિર્ભવતિ ।
સર્વમઙ્ગલમાપ્નોતિ । સર્વદેવનમસ્કૃતો ભવતિ । સર્વે રાજાનો
વશ્યા ભવન્તિ । રમ્ભાદિભિઃ પૂજિતો ભવતિ । સ્વર્ગભોગમાપ્નોતિ ।
ગુરોરનુજ્ઞયા શુક્રવારે દિવા રાત્રૌ ચ ચમ્પકતૈલાદ્યૈઃ કૃતસ્નાતાં
સર્વાલઙ્કારભૂષિતાં શુભ્રવસ્ત્રધરાં શ્રીચન્દનવિલિપ્તાઙ્ગીં
કસ્તૂરીતિલકોપેતાં કુઙ્કુમલિપ્તકુચભારાં પુષ્પદામયુક્તધમ્મિલ્લાં
તામ્બૂલપૂરિતમુખીં સ્વેદબિન્દૂલ્લસન્મુખીં બિમ્બોષ્ઠીં કુન્દરદનાં
કમ્બુકણ્ઠીં મઞ્જુહાસાં યૌવનોન્મત્તાં કઞ્જલોચનાં પૃથુનિતમ્બાં
રાજરમ્ભોરું સમ્પૂર્ણચન્દ્રવદનાં સમ્ભોગેચ્છાં શુકવાણીં
સઙ્ગીતરસિકાં કુરવકરસાઞ્ચિતપાણિપાદાં વશવર્તિનીં
ભાર્યાં પુષ્પશય્યાયામુત્તાનશાયિનીં કૃત્વા દર્પણવન્નિર્મલં
જગન્મોહનચક્રં ગન્ધદ્રવ્યેણ ધૂપદીપૈશ્ચ પરિમલીકૃતં
કુઙ્કુમમિલિતૈર્મલ્લિકાકુડ્મલૈઃ શરસઙ્ખ્યયા પૂજયન્ બ્રાહ્મણો
દેવભોગમાપ્નોતિ । વસન્તનવરાત્રિષુ ભાર્યાજગન્મોહનચક્રે
મલ્લિકાકુડ્મલૈઃ સહસ્રનામભિઃ રહસ્યનામભિશ્ચ પૂજિતા
રાજશ્યામલા રાજવશઙ્કરી ભવતિ । શુક્રવાસરયુક્તાયાં સપ્તમ્યાં

રાત્રૌ ભાર્યાયા જગન્મોહનચક્રે પ્રથમયામે કલ્હારપુષ્પૈઃ
સહસ્રનામભિર્દેવતાં પૂજયન્ દેવતાસાલોક્યમાપ્નોતિ । તસ્યામેવ દ્વિતીયયામે
ભાર્યાજગન્મોહનચક્રે પારિજાતપુષ્પૈઃ સહસ્રનામભિઃ પૂજયન્
દેવતાસામીપ્યમાપ્નોતિ । તસ્યામેવ તૃતીયયામે ભાર્યાજગન્મોહનચક્રે
મન્દારપુષ્પૈઃ સહસ્રનામભિઃ પૂજયન્ દેવતાસારૂપ્યમાપ્નોતિ । તસ્યામેવ
ચતુર્થયામે જગન્મોહનચક્રે ચમ્પકપુષ્પૈઃ સહસ્રનામભિઃ પૂજયન્
દેવતાસાયુજ્યમાપ્નોતિ । સર્વરાત્રિષુ જગન્મોહનચક્રે મલ્લિકાકુડ્મલૈઃ
પૂજિતા શ્યામલા કામિતાર્થપ્રદા ભવતિ । ગ્રીષ્મકાલે સર્વરાત્રિષુ
શ્રીચન્દનવિલિપ્તભાર્યાજગન્મોહનચક્રં પૂજયન્ સર્વસિદ્ધિમાપ્નોતિ ।
દૂર્વાભિઃ પૂજયન્ મહદાયુષ્યમશ્નુતે । અષ્ટમ્યાં શુક્રવાસરયુક્તાયાં
રાત્રૌ જગન્મોહનચક્રે રાજશ્યામલામ્બાં શ્રીચન્દનેન પૂજયન્ માનવો
ગન્ધલિપ્તો જગન્મોહકો ભવતિ । મહાનવમ્યાં શુક્રવાસરયુક્તાયાં રાત્રૌ
જગન્મોહનચક્રે કુઙ્કુમાક્ષતૈર્દેવતાં પૂજયિત્વા પૂજિતાક્ષતાન્ રાજ્ઞે
નિવેદયેત્ । રાજા દાસભાવમાપ્નોતિ । ત્રયોદશ્યાં શુક્રવાસરયુક્તાયાં
રાત્રૌ ભાર્યાજગન્મોહનચક્રં પૂજયન્ માનવઃ કામસુન્દરો ભવતિ ॥

ચન્દ્રદર્શનયુક્તાયાં દ્વિતીયાયાં શુક્રવારયુક્તાયાં
ભાર્યાજગન્મોહનચક્રે રાજશ્યામલામ્બાં શ્વેતગન્ધાક્ષતૈઃ
શ્વેતપુષ્પૈશ્ચ પૂજયન્ સાધકો દેહાન્તે રાજા ભવતિ ।
સર્વભોગપ્રદા સર્વસૌભાગ્યપ્રદા દીર્ઘાયુષ્યપ્રદા મહાયોગપ્રદા
મહામઙ્ગલપ્રદા કામ્યપ્રદા શ્રીરાજશ્યામલા દેવેન્દ્રભોગપ્રદા ભવતિ ।
સર્વકામ્યરહસ્યપૂજાન્તે મૈથુનં દેવતાપ્રીતિકરં ભવતિ । મોક્ષપ્રદં
ભવતિ । સ એવ ભોગાપવર્ગઃ । ગુર્વનુજ્ઞાયા ગુપ્તઃ ક્ષપણકો મુક્તો
ભવતિ । એવં કાન્તાયાઃ પૂજિતા સ્વર્ણચક્રે શ્યામલા મઙ્ગલપ્રદા
ભવતિ । દ્રોહિણાં નોપદેશઃ । ક્ષપણકાનાં પઞ્ચાધિકરણૈઃ પરો
મોક્ષો નાન્યથેતિ ચ એવં વેદ । ઇત્યુપનિષત્ ॥

ઇતિ રાજશ્યામલારહસ્યોપનિષત્ સમાપ્તા ।

(શાક્ત-ઉપનિષદઃ)

Proofread by Kasturi navya sahiti, Aruna Narayanan

*Rajashyamalarahasya Upanishad*

pdf was typeset on February 14, 2021

Please send corrections to *sanskrit@cheerful.com*